**दिनाङ्क :- 06.05.2026**
**प्रात: - 06:55**
**संस्कृत वार्ता:**

## अथ वार्ताः

### वियतनाम राष्ट्रपतिना टो लैम

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां वियतनाम-देशस्य राष्ट्रपतिना टो लैम इत्यनेन सह वार्तालापं करिष्यति। उभौ नेतारौ द्वैपाक्षिकसम्बन्धेषु अपि च परस्पर-हितानां क्षेत्रीय-वैश्विक-विषयेषु विस्तृतं चर्चां करिष्यतः। वियतनाम-देशस्य राष्ट्रपतिः भारतस्य त्रिदिवसीया यात्रायां ह्यः नवदिल्ल्यां संप्राप्तवान्। तेन सह वियतनाम-सर्वकारस्य अनेकेषां मन्त्रिणां, वरिष्ठाधिकारिणां च उच्चस्तरीयः प्रतिनिधि मण्डलम् अस्ति। सहैव एकम् प्रबलं वाणिज्यप्रतिनिधि-मण्डलम् अपि समूहेन सह अस्ति। अस्मिन् वर्षे अप्रैल-मासे वियतनाम्-देशस्य राष्ट्रपतिरूपेण निर्वाचनानन्तरं राष्ट्रपत्युः टो लैम वर्यस्य भारतस्य एषा प्रथमा राजकीययात्रा अस्ति।

### मन्त्रिमण्डल

भारतस्य कार्पासक्षेत्रस्य बाधायाः निवारणाय, विकासे न्यूनतायाः समाधानाय, गुणवत्तायाः चिन्तायै च केन्द्रमन्त्रिमण्डलेन कपास-उत्पादकता-अभियान, कपास-कान्ति इत्यस्य कृते षट्शताधिक पञ्चसहस्र-कोटिरूप्यकाणि स्वीकृतानि। ह्यः नवदिल्ल्यां वार्ताहरान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत् इदम् अभियानं, सर्वकारस्य फार्म्-टु-फाईबर-टु-फैक्टरी-टु-फ़ैशन्-टु-फ़ारेन् इति 5F विषयैः सह संरेखितम् अस्ति, कार्पासस्य उत्पादकतां वर्धयितुं च केन्द्रितम् अस्ति। केन्द्रीयमन्त्रिमण्डलेन आपत्कालीन-ऋण-रेखा-प्रत्याभूति-योजना शून्य दशमलवोत्तर पञ्चापि अनुमोदिता। योजनायाः अन्तर्गतं एम्. एस्. एम्. ई. इत्येतेषां कृते शतप्रतिशतं ऋण-प्रत्याभूतिः प्रदीयते। केन्द्रीयमन्त्रिमण्डलेन भारत-सेमिकण्डक्टर्-मिशन् इत्यस्य अन्तर्गतं इतोऽपि द्वे सेमिकण्डक्टर्-परियोजने अनुमोदिते।

एतेषु सेमिकण्डक्टर्-पैकजिङ्ग्-सौकर्येन सह गैलियम्-नाईट्राड् तन्त्रज्ञानस्य आधारे देशस्य प्रथमा वाणिज्य-लघु/माइक्रो-एल्. ई. डी. प्रदर्शन-सौविध्यम् अन्तर्भवति। केन्द्रीयमन्त्रिमण्डलेन सर्वोच्चन्यायालयस्य (न्यायाधीशानां सङ्ख्या) संशोधन-विधेयकम्, विंशति षट्विंशति संसदि उपस्थापयितुं प्रस्तावोपि स्वीकृतः। श्री वैष्णवः अवदत् यत्, एतत् विधेयकं सर्वोच्चन्यायालयस्य (न्यायाधीशानां सङ्ख्या) अधिनियमः, ऊनविंशति षट् पञ्चाशत् इत्यस्य संशोधनं कर्तुं प्रयतते।

**पश्चिमबङ्गस्य - ममता बनर्जी**

पश्चिमबङ्गस्य मुख्यमन्त्री ममता बनर्जी मुख्यमन्त्रीपदात् स्व त्यागपत्रप्रदानाय निराकृतवती, तस्याः अनुसारम् मतानि बलात् लुण्ठितानि, मतदानप्रक्रियायां च कपटम् अभवत्। पश्चिमवङ्गस्य निवर्तमान-मुख्यमन्त्री ममता बनर्जी इत्यस्याः व्याख्यायाः प्रतिक्रियारूपेण भाजपेति दलेन उक्तं यत् भारतं लोकतन्त्रम् अस्ति तथा च सर्वदा तस्य सम्मानम् करणीयम्। श्री सम्बित पात्रा अवदत् यत् एतत् भाजपेति दलस्य उपरि आक्रमणं नास्ति अपितु लोकतन्त्रस्य संविधानस्य च उपरि आक्रमणम् अस्ति।

**आई. पी. एल्.**

आई. पी. एल्. क्रिकेट्-क्रीडायां गतरात्रौ दिल्ल्याः अरुण जेटली-क्रीडाङ्गणे चेन्नई-सूपर्-किङ्ग्स्, दलेन दिल्ली-कैपिटल्स दलं अष्ट-स्तोभैः पराजितम्। अद्य सायं सार्द्ध सप्तवादने सन राईजर्स हैदराबाद, पञ्जाब् किङ्ग्स् दलयोः मध्ये हैदराबादे स्पर्धा भविष्यति।

।। **इति वार्ता**:।।